# First Terminal Evaluation - 2017
First Language Part - 1 Sanskrit - Paper I
## SANSKRIT
(For Academic & Oriental Sanskrit Schools)

**STD - IX** | Time - 1½ Hours
Total Score - 40

निर्देशा: –
* १५ निमेषा: समाश्वासकाल:। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं काल: उपयोक्तव्य:।
* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
* उत्तरलेखने मूल्याङ्का: काल: च परिगणनीया:।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपि: उपयोक्तव्या।

**I. कोष्ठकात् <u>चतुर्णां</u> समुचितमुत्तरं निर्धार्य लिखत ।** (1x4=4)

क. भानुः इत्यर्थकं पदं चित्वा लिखत । (सूर्यः, सुमेरुः, शिला)

ख. कृतम् उपकारं के न विस्मरन्ति ? (दुर्जनाः, साधवः, मूर्खाः)

ग. निवृत्तरागस्य तपोवनं किम् ? (आश्रमम्, वनम्, गृहम्)

घ. कुलीरः इत्यस्यार्थः कः? (कर्कटः, मत्स्यः, बकः)

ङ. हितोपदेशः केन विरचितः ? (सोमदेवेन, विष्णुशर्मणा, नारायणपण्डितेन)

**II. यथोचितं योजयत ।** (4x1=4)

| | | |
|---|---|---|
| क. हनूमान् | - | पुण्यसेनः |
| ख. पद्मगर्भः | - | मलिनवस्त्रधारी |
| ग. कुचेली | - | मारुतिः |
| घ. उज्जयिनी | - | सरः |

**III. अधोदत्तवाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्त अव्ययपदानि चित्वा लिखत ।**

मार्जारस्य भाषणं श्रुत्वा मां न आक्रमिष्यति इति विचिन्त्य मूषकः जालं त्रोडयितुं निश्चिकाय। (1x3=3)

**IV. अधोदत्तयोः इष्टतमश्लोकस्य आस्वादनटिप्पणीं लिखत ।** (1x4=4)

क. स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ॥

ख. सा राक्षसानां प्रवरेण जानकी
स्वशीलसंरक्षणतत्परा सती ।
अनेन नूनं प्रतिदुष्टकर्मणा
हता भवेदार्यपथे परे स्थिता ।।

**V. उदाहरणानुसारं सन्धत्त ।** **(1x1=1)**

**उदा.** तत् + श्रुत्वा - तच्छ्रुत्वा । तावत्+ श्रुत्वा- -------------।

**VI. उदाहरणानुसारं विग्रहवाक्यं लिखत ।** **(1x1=1)**

**उदा-** दण्डपाणिः- दण्डं पाणौ यस्य सः । चक्रपाणिः- ------------ ।

**VII. सूचनानुसारं गद्यक्रमं लिखत ।** **(1x2=2)**

कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥

**सूचनाः -** कुचेलिनं--- बह्वाशिनं--- अस्तमये च --- चक्रपाणिनं अपि--- विमुञ्चति ।

**VIII. (अ) खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।**

**(1x4=4)**

भारतीयदर्शनेषु अतिविशिष्टं भवति योगदर्शनम् । षट् दर्शनेषु अन्यतमस्यास्य प्रणेता भवति पतञ्जलिमहर्षिः। तेन विरचितः ग्रन्थः भवति योगसूत्रम् । योगशास्त्रे यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाणि अष्टाङ्गानि कल्पितानि । योगशास्त्रस्य प्राधान्यम् उद्बोधयितुं लोके प्रतिवर्षं जूण् 21 अन्ताराष्ट्रयोगदिनत्वेन आचरन्ति ।

क. षट् दर्शनेषु अन्यतमः कः ?

ख. पतञ्जलिमहर्षिणा रचितः ग्रन्थः कः ?

ग. अष्टाङ्गानि कानि ?

घ. अन्ताराष्ट्रयोगदिनं कस्मिन् दिने आचरन्ति ?

**अथवा**

**(आ). अधोदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

आ). स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान्।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनम्॥

क) श्लोकात् हनूमान् इत्यर्थकं पदं चित्वा लिखत ।

ख) सीतादर्शनोत्सुकः कः ?

ग) सः चारुदर्शनां तां न पश्यति । काम् ?

घ) श्लोकात् एकं क्रियापदं चित्वा लिखत ।

**IX. उदाहरणानुसारं "यदा-तदा" उपयुज्य वाक्यं परिवर्तयत ।** (1x2=2)

**उदा- अध्यापकः आगतः । छात्राः उदतिष्ठन् ।**

यदा अध्यापकः आगतः तदा छात्राः उदतिष्ठन् ।

क). रामः वनं गतः । दशरथः दिवं गतः ।

...........................................।

**X. प्रादेशिकभाषया विवर्तयत।** (1x5=5)

भारतस्य प्रमुखसङ्गीतज्ञेषु अन्यतमः भवति डा. के जे येशुदासः । अयं कर्णाटकसङ्गीतस्य मधुरकण्ठः गायकः । सः अनेकासु भारतीयभाषासु चलनचित्रगीतानि अगायत्। केरलराज्यस्य कोच्चिमण्डले अस्य जननम् अभवत्। चेम्पै वैद्यनाथभागवतस्य प्रमुखशिष्यः भवति गानगन्धर्वः येशुदासः।

**XI.अनूदितकाव्यानि महाकाव्यानि च विविच्य पट्टिकां लिखत ।** (1x2=2

कुमारसंभवम्, माकन्दमञ्जरी, रघुवंशम्, चिन्ताविष्टा सीता ।

**XII.अधोदत्तवाक्यात् सम्बोधनरूपं चित्वा लिखत ।** (1x1=1

" भो बक ! मामपि तत्र नय ।"

**XIII. अधोदत्तम् आशययुक्तं श्लोकं चित्वा लिखत।** (1x2=2)

**आशयः** – सज्जनानां कथितं पुनरुक्तं न भवति ।

**क)** उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम्॥

**ख)** वनेऽपि दोषाःप्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ।

XIV . (अ) संभाषणांशान् पूरयत । (1x5=5)

| | | |
|---|---|---|
| जोसफः | - | नमस्ते गणेशः ! ------------? |
| गणेशः | - | ----------------। अहं हितोपदेशकथां पठामि । |
| जोसफः | - | ---------------------------? |
| गणेशः | - | नारायणपण्डितेन विरचितं भवति। |
| जोसफः | - | अहमपि ----------------------। |
| गणेशः | - | पठितुम् इच्छति चेत् ददामि । |
| जोसफः | - | अस्तु----------------------। |
| गणेशः | - | धन्यवादः । |

**अथवा**

**(आ) सूचनाः उपयुज्य कथासंग्रहं लिखत ।**

अङ्कणस्थितः आम्रः -- प्रथमकुसुमोत्पत्तिः -- बालकः स्वीकरोति -- मातुः ताडनम् -- बालकेन मञ्जर्याः क्षेपणं -- समाहरणार्थं नागच्छामि इत्युक्तिः -- पुत्रस्य वियोगः -- मातुः दुःखम् ।

**** **** *** ***